# Vyasamaharshiproktam Rudra Stotram

# व्यासमहर्षिप्रोक्तं रुद्रस्तोत्रम्

## Document Information

Text title : Vyasamaharshiproktam Rudra Stotram

File name : vyAsamaharShiproktaMrudrastotram.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : from Kurmapurana, kUrmapurANe pUrvabhAge 30/44-52

Latest update : August 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 13, 2022

*sanskritdocuments.org*

# व्यासमहर्षिप्रोक्तं रुद्रस्तोत्रम्

व्यास उवाच ।
नमो रुद्राय महते देवदेवाय शूलिने ।
त्र्यम्बकाय त्रिनेत्राय योगिनां गुरवे नमः ॥ १॥

नमोऽस्तु वामदेवाय महादेवाय वेधसे ।
शम्भवे स्थाणवे नित्यं शिवाय परमेष्ठिने ॥ २॥

नमः सोमाय रुद्राय महाग्रासाय हेतवे ।
प्रपद्येऽहं विरूपाक्षं शरण्यं ब्रह्मचारिणम् ॥ ३॥

महादेवं महायोगमीशानं चाम्बिकापतिम् ।
योगिनां योगदातारं योगमायासमावृतम् ॥ ४॥

योगिनां गुरुमाचार्यं योगिगम्यं पिनाकिनम् ।
संसारतारणं रुद्रं ब्रह्माणं ब्रह्मणोऽधिपम् ॥ ५॥

शाश्वतं सर्वगं शान्तं ब्रह्मण्यं ब्राह्मणप्रियम् ।
कपर्दिनं कालमूर्त्तिममूर्त्तिं परमेश्वरम् ॥ ६॥

एकमूर्त्तिं महामूर्त्तिं वेदवेद्यं दिवस्पतिम् ।
नीलकण्ठं विश्वमूर्त्तिं व्यापिनं विश्वरेतसम् ॥ ७॥

कालाग्निं कालदहनं कामदं कामनाशनम् ।
नमस्ये गिरिशं देवं चन्द्रावयवभूषणम् ॥ ८॥

विलोहितं लेलिहानमादित्यं परमेष्ठिनम् ।
उग्रं पशुपतिं भीमं भास्करं परमं तपः ॥ ९॥

इति कूर्मपुराणे पूर्वभागे त्रिंशाध्यायान्तर्गतं
व्यासमहर्षिप्रोक्तं शिवस्तोत्रं समाप्तम् ।
कूर्मपुराणे पूर्वभागे ३०/४४-५२

Proofread by PSA Easwaran

*Vyasamaharshiproktam Rudra Stotram*

pdf was typeset on August 13, 2022

Please send corrections to *sanskrit@cheerful.com*